॥ अथसत्यगणपतीव्रतकथाप्रारंभः ॥

Scanned with OKEN Scanner

श्रीगणेशायनमः ॥ अथसत्यगणपतिव्रतंतत्कथांचारभ्यते ॥ अ
थकर्तावैशाखशुक्लपौर्णिमायांशुक्लचतुर्थ्यांभृगुभौमवासरे यस्मि
न्कस्मिन्नपिशुभदिवसेवाप्रातास्तिलामलककल्केनस्नात्वानित्यवि
धिंस्वस्तिपुंण्याहवाचनंचकृत्वा ॥ पुनःप्रदोषसमयेगोमयलिप्तेदे
शेरंगवल्लीयुते कदलीस्तंभादिसुशोभिते नानापुष्पादर्शावलिवि
राजितेमंडपे तत्रषट्कोणयुतंगणपतियंत्रंविलिख्यतन्मध्येसत्य
गणपतिमावाह्य ॥ अष्टदलकोणेरमेशंरमांपरमेश्वरमुमांवराहंम
हींमदनंशक्तिंचावाह्यपूजाद्रव्याणिसंगृह्य॥आचम्यप्राणानायम्य
देशकालौसंकीर्त्यपुण्यशुभतिथौममेहजन्मनिअन्यजन्मानिजन्मां

तरेवाजन्मादारभ्यअद्ययावदार्जितपापनिरसनद्वाराकामनासि
द्धिप्राप्त्यर्थंश्रीसत्यगणेशव्रतपूजाराधनंकलशस्थापनंतत्कथाश्र
वणंचकरिष्ये॥तत्रादौविघ्ननिरसनार्थंशिष्टसंप्रदायानुसारेणगण
पतिंसंपूज्य ॥आधारादिपीठपूजांतंकृत्वागणपतियंत्रंविलिख्यअ
ष्टकोणेषुरमेशादीनावाह्यअभ्युत्तरणपूर्वकंबिंबशुद्धिंकृत्वागणपति
प्रतिमांकलशेनिधायावाह्यध्यायेत् ॥शमीमंदारदूर्वाक्षतपुष्पादि
भिरंजलिंकृत्वा ॥ उद्यत्सूर्यसमाभासंसर्वाभरणभूषितं ॥ स्थिरा
सनंगजेंद्रास्यंभक्तानांभद्रदायकं ॥ रक्तवर्णंचतुर्बाहुंत्रिनेत्रंचंद्रशे
खरं ॥ लसद्दंतांकुशंपाशंवक्रतुंडधरंभजे ॥ सदासर्वरूपंत्रिसत्यं

 त्रिभेदैर्विहीनंसमंनेतिरूपंपुराणं ॥ नुतंयोगिभिर्वेदमुख्यैः शिवा
दैर्गणानांपतिंज्येष्ठराजंभजामि ॥ इतिध्यात्वा ॥ नवशक्तिद्वादश
 नामान्तंकृत्वा ॥ अथांगपूजांकरिष्ये ॥ ॐगणेश्वरायनमःपादौ
पूजयामि॥विघ्नराजायनमःजानुनी॰॥अखुवाहनायनमःऊरूपूज
यामि॥ गणनाथाय॰॥हृदयंपू॰ ॥ स्थूलकंठाय॰॥कंठंपू॰॥गजा
ननाय॰॥मुखंपू॰ ॥ विश्वभर्त्रे॰॥ नेत्राणिपू॰ ॥ गौरीपुत्रायन
मः ॥ शिरःपू॰ ॥ पाशहस्ताय॰॥ हस्तान्पू॰ ॥ विघ्नहर्त्रे॰ ॥
तृतीयनेत्रंपू॰ ॥ श्रीसत्यगणपतयेनमः ॥सर्वांगंपूजयामि ॥ इ
त्यंगपूजांसमर्पयामि ॥ अथावरणपूजांकरिष्ये ॥ गांहृदयायन

Scanned with OKEN Scanner

मः ॥ गींशिरसेनमः॥गूंशिखायैनमः ॥गैंकवचायनमः ॥ गौंनेत्र
त्रयायनमः ॥ गः अस्त्रायनमः ॥ इतिप्रथमावरणदेवताभ्योन
मः॥जलगंधाद्युपचारान्समर्पयामि॥ इतिप्रथमावरणं ॥ अथद्वि
तीयावरणपूजांकरिष्ये ॥ रमारमेशाभ्यांनमः ॥ गिरिजावृषांका
भ्यांनमः ॥ महीवराहाभ्यांनमः॥रतिकंदर्पाभ्यांनमः॥ इतिद्विती
यावरणं ॥ अथतृतीयावरणपूजांकरिष्ये ॥ सिद्धिमोदाभ्यांनमः
॥ मदनवतीदुर्मुखाभ्यांनमः ॥ मदद्रवाविघ्नाभ्यांनमः॥ वसुंधरा
शंखनिधिभ्यांनमः ॥ वसुमतीपुष्पनिधिभ्यांनमः ॥ इतितृतीया
वरणं ॥ अथचतुर्थावरणपूजांकरिष्ये ॥ असितांगभैरवायनमः॥

रुरुभैरवायनमः ॥ चंडभैरवायनमः ॥ प्रचंडभैरवायनमः ॥ क्रो
धनभैरवायनमः ॥ उन्मत्तभैरवायनमः ॥ कपालभैरवायनमः ॥
भीषणभैरवायनमः ॥ संहारभैरवायनमः ॥ इतिचतुर्थावरणं ॥
अथपंचमावरणपूजांकरिष्ये ॥ इंद्रायनमः ॥ अग्नयेनमः ॥ य
मायनमः ॥ निर्ऋतये० ॥ वरुणाय० ॥ वायवे० ॥ कुबेराय०
॥ ईशानाय० ॥ इतिपंचमावरणं ॥ अथषष्ठावरणपूजांकरिष्ये॥
वज्रायनमः ॥ शक्तये० ॥ दंडाय० ॥ खड्गाय० ॥ पाशाय० ॥
अंकुशाय० ॥ गदाय० ॥ शूलाय० ॥ इतिषष्ठावरणं ॥ अथस
प्तमावरणपूजांकरिष्ये ॥ वक्रतुंडायनमः॥एकदंताय० ॥ लंबोद

राय० ॥ विघ्नराजाय० ॥ महोदराय० ॥ विकटाय० ॥ गजान
नायनमः॥इतिसप्तमावरणं ॥ अथाष्टमावरणपूजांकरिष्ये ॥ अ
णिम्नेनमः ॥ महिम्ने० ॥ लघिम्ने० ॥ गरिम्ने० ॥ प्राप्त्यै० ॥
प्राकाम्यैनमः ॥ ईशित्वायनमः ॥ वशित्वायनमः ॥ इत्यष्टमाव
रणं ॥ अथनवमावरणपूजांकरिष्ये ॥ ब्राम्ह्यैनमः ॥ माहेश्वर्यै०
कौमार्यै० ॥ वैष्णव्यै०॥वाराह्यैनमः॥इंद्राण्यैनमः॥चामुंडायै० ॥
इतिनवमावरणं॥अथदशमावरणपूजांकरिष्ये ॥ॐगांहृदयांगदेव
ताभ्योनमः ॥ ॐश्रींगींशिरसांगदेवताभ्योनमः ॥ ॐह्रींगूंशि
खांगदेवताभ्योनमः ॥ ॐक्लींगैंकवचांगदेवताभ्योनमः॥ ॐक्रौं

स०ग० स्माद्यज्ञा ÷ संभृतं *÷ ग्राम्याश्चये ॥ रचितंब्रह्मसूत्रंचकांचनं पू०
चोत्तरीयकं ॥ मयादत्तंगृहाणेदंभक्तानांभक्तिदायक॥उपवीतं ॥
॥८॥ तस्माद्यज्ञात्सर्व *÷ ऋचस्सा ÷ जायत॥ गंधंकर्पूरसंयुक्तंदिव्यचं
दनचर्चितं ॥ विलेपनार्थंविघ्नेशगणाध्यक्षददामिते ॥ गणाध्यक्षा
यनमः ॥ गंधं ॥ अक्षतान्धवलान्देवासिद्धगंधर्वपूजित ॥ स्वीकु
रुष्वेभवक्क्रेशसर्वसिद्धिंप्रयच्छमे ॥ अक्षतान् ॥ तस्मा *÷ वयः॥सु
गंधीनिचपुष्पाणिसर्वसिद्धिप्रदायक ॥ विविधानिचपत्राणिगृहा
णपरमेश्वर॥ पुष्पाणिसमर्पयामि ॥ अथपत्रपूजांकरिष्ये ॥ सु ॥८॥
मुखायनमः ॥ केतकीपत्रं ॥ गणाधिपाय०॥ भृंगराजपत्रं ॥

।

उमापुत्राय०॥ बिल्वपत्रं ॥ गजाननाय०॥ दूर्वापत्रं ॥ लंबोदराय०॥ बदरीपत्रं ॥ हरसूनवे०॥ धुत्तूरपत्रं ॥ गजकर्णाय०॥ तुलसीपत्रं ॥ गुहाग्रजाय०॥ अपामार्गपत्रं ॥ भिन्नदंताय०॥अर्कपत्रं॥ पत्नीहीनाय०॥ शमीपत्रं ॥ बटवे०॥ डाडिमीपत्रं ॥ शूलधराय०॥ देवदारुपत्रं ॥ भालचंद्राय०॥ मरुगपत्रं ॥ हेरंबाय० ॥ सिंदूरपत्रं ॥ शूर्पकर्णाय०॥ करवीरपत्रं०॥ सिद्धिविनायकाय० ॥ जातीपत्रं०॥ सत्याय०॥ विष्णुक्रांतपत्रं ॥ द्वैमातुराय०॥ ब्रह्मपत्रं ॥ मूषकवाहनाय०॥ चूतपत्रं ॥ विघ्नहर्त्रे०॥ पुन्नागपत्रं॥ इभवक्त्राय०सर्वपत्राणिसमर्पयामि॥अथपुष्पपूजांकरिष्ये॥ गणा

धिपाय०॥ शतपुष्पंसमर्पयामि ॥ब्रह्मचारिणे०॥ चूतपुष्पं ॥ विना
यकाय०॥ पुन्नागपुष्पं ॥ उमापुत्राय०॥मल्लिकापुष्पं ॥ अघनाश
नाय०॥डाडिमीपुष्पं॥ लंबोदराय०॥ कर्णिकापुष्पं॥ गजकर्णिका
य०॥नंद्यावर्तपुष्पं ॥सुराग्रण्यै०॥ कुमुदपुष्पं ॥ पत्नीहीनाय०॥पा
रिजातपुष्पं ॥ अनेकाभरणाय०॥ कमलपुष्पं ॥ कल्पवृक्षाय०
मरुगपुष्पं ॥ रुद्रप्रियाय०॥ अर्कपुष्पं ॥ गुहाग्रजाय०॥ अशो
कपुष्पं ॥ भक्तप्रियाय०॥ जातीपुष्पं ॥ भालचंद्राय०॥ चंपकपु
ष्पं ॥ सर्वसिद्धिप्रदायकाय० ॥न्हीभेदपूष्पं ॥ गणाध्यक्षाय०॥
कल्हारपुष्पं ॥ विघ्ननाशिने०॥ यूथिकापुष्पं ॥ वक्रतुंडाय०॥ ब

दरीपुष्पं ॥ हेरंबाय०॥ हरिपुष्पं ॥ मूषकवाहनाय०॥ जंबीरपुष्पं ॥ कुमारगुरवे०॥ नागचंपकपुष्पं ॥ इतिपुष्पपूजांसमर्पयामि ॥ श्रीसत्यगणपतयेनमः ॥ एकविंशतिपुष्पाणिसमर्पयामि ॥ अथसहस्रनामाष्टोत्तरशतनामानिकृत्वाथोत्तरपूजांकरिष्ये ॥ यत्पुरुषं ॐ उच्येते ॥ दशांगंगुग्गुलंधूपंसुगंधंसुमनोहरं ॥ उमासुतप्रदास्यामिममंगलदोभव ॥ धूपंसमर्पयामि ॥ ब्राह्मणोस्य ॐ जायत ॥ घृताक्तवर्तिसंयुक्तंवन्हिनायोजितंमया ॥ दीपंज्ञानप्रदंनित्यमुररीकुरुशांकर ॥ दीपंसमर्पयामि ॥ चंद्रमामन ॐ जायत॥गोधूमशर्कराक्षीरसर्पिर्भिर्युतमोदकान् ॥ नैवेद्यंस

पदंदास्येगृहाणपरमेश्वर ॥ नैवेद्यंसमर्पयामि ॥ वेदाहमेतं ⁝
दास्ते ॥ कर्पूरशकलैर्युक्तंनागवल्लिदलैर्युतं ॥ तांबूलंगृह्यतांदेव
सर्वमंगलकारक॥ तांबूलंस० ॥ हिरण्यगर्भस्समव ⁝ विधेम ॥
सुवर्णपुष्पंसमर्पयामि ॥ इदंफलंमयादेवस्थापितंगणनायक ॥
तेनमेसफलावाप्तिर्भवेज्जन्मनिजन्मनि ॥ फलं॥ धातापुरस्ताद्यमु
⁝ अयनायविद्यते ॥ आज्याक्तवर्तिसंयुक्तंचंदनेनविलेपितं ॥
आर्तिक्यंगृह्यतांदेवअज्ञानतिमिरापह॥ नीरांजनंसमर्पयामि ॥
नाभ्याआसीत् ⁝ यन् ॥ यद्यन्मनोरथंदेहिनमस्तेभक्तवत्सल
॥त्वत्पादपद्मयुगुलेमन्मूर्धाभ्रमरायते ॥ पापोहं ⁝ भव ॥ नम

स्कारान्त्समर्पयामि सप्तास्या ॰ पशुं ॥ यानिकानीतिप्रदक्षि
णांसमर्पयामि ॥ यज्ञेनयज्ञम ॰ संतिदेवाः ॥ नानामंत्रंसमुच्चा
र्यंयथाशक्त्यामयार्पितं ॥ पुष्पांजलिंगृहाणेदंश्रीसत्यगणनायक
॥ मंत्रपुष्पाणि॥ ॥ अथप्रार्थनांकरिष्ये ॥ ध्यायेत्सत्यंगणाध्य
क्षमनंतगुणपूरितं ॥ लोकनाथंत्रिलोकेशंशेषाभरणभूषितं ॥१॥
रक्तवर्णंरक्तनेत्रंपाशांकुशरदंधरं ॥ विनायकंचतुर्बाहुंमोदकधृ
तहस्तकं॥१॥उमासुतंजनानंदंसर्वदेवार्चितंप्रभुं ॥ सत्यैकंसत्यसं
कल्पंसत्यंसत्यव्रतंभजे ॥३॥सत्यचर्यंसत्ययोनिंचसत्यशीलंगणा
धिपं॥नमामिसततंभक्त्यासत्यसंकल्पशीलिनं ॥ ४ ॥ सत्यव्रतं

Scanned with OKEN Scanner

सत्यपरंत्रिसत्यंसत्यस्ययोनिंनिहितंचसत्ये ॥ सत्यस्यसत्यंऋत
सत्यनेत्रंसत्यात्मकंत्वांशरणंप्रपद्ये ॥ ५ ॥ सदासर्वरूपंत्रिस
त्यंत्रिभेदैर्विहीनंसमंनेतिरूपंपुराणं ॥ नुतंयोगिभिर्देवमुख्यैःशि
वाद्यैर्गणानांपतिंज्येष्ठराजंभजामि ॥ ६ ॥ सत्यरूपंसत्यसंधं
सत्यनामांकितंविभुं ॥ यत्सत्येनजगत्सत्यंसत्यतत्वंनमाम्यहं॥
॥ ७ ॥ प्रणमामिजगन्नाथंजगत्कारणकारणं ॥ अनाथनाथशि
वदंतापत्रयविमोचनं ॥ ८ ॥ अमोघंपुंडरीकाक्षंगणेशंविघ्ननाश
नं ॥ हृषीकेशंजगन्नाथंवागीशंवरदायकं ॥ गुणपूर्णंगुणातीतमु
मासुतमहंभजे ॥ जनार्दनंजनानंदंनागयज्ञोपवीतिनं ॥ १० ॥

प्रणमामिसदासत्यंनगजायाःप्रियंकरं ॥ सत्यैकदंतंवरदंवंदेहं
कामदंवरं ॥ ११ ॥ लीलयाचततंविश्वंयेनतस्मैनमोनमः ॥ उ
दयादित्यसंकाशंज्ञानानंदशरीरिणं ॥ १२ ॥ चतुर्भुजंचतुर्बाहुं
त्रिनेत्रंशशिशेखरं ॥ आश्लिष्टंसिद्धिबुद्धिभ्यांवामदक्षिणतःक्रमा
त् ॥ १३ ॥ ब्रह्मरुद्रादिभिस्सर्वैरुपास्यंसर्वदैवतैः ॥ स्मितवक्रंवि
शालाक्षंलंबोदरमहंभजे ॥१४॥फणिपतिफणिमणिविलसितमुकु
टंदिनकरहिमकरहुतवहनयनं ॥ मदजलपरवशगजवरवदनंप्रण
मतगणपतिमभिमतफलदं ॥ १५ ॥ अगणितफणिफणमणिग
णकिरणैररुणिततेजतनुरवितथवरदः ॥ कटतटपरिलुठदलिकुल

सं०ग० हिनदोप्रणमतगणपतिमभिदिशतुनः ॥ १६ ॥ नमःसत्यैकदं पू०
तायकर्त्रेनमःशुद्धसत्वायविश्वस्यभर्त्रे ॥ करालापकालात्मकाया
॥१॥ स्यहर्त्रेनमस्तेजगन्मंगलायादिमूर्ते ॥ १७ ॥ अन्यथाशरणंना
स्ति *॥* ॥ १८ ॥ जातस्यजायमानस्यगर्भस्थस्यचदेहिनां ॥
माभून्ममकुलेजन्मशांकरंदैवतंविना ॥ १९॥ अनायासेनमरणं
विनादैन्येनजीवनं ॥ गणेशकृपयादेहित्वयिभक्तिमचंचलां॥२०॥
रुग्णपातकदौर्भाग्यदारिद्र्यविनिवृत्तये ॥ अशेषाघविनाशायप्र
सीदगणनायक ॥ २१ ॥ आवाहनंनजानामिनजानामितवार्चनं
॥ पूजाक्रमंनजानामितवदासोस्मिसर्वदा ॥ २२ ॥ इतिप्रार्थ ॥१॥

नांसमर्पयामि ॥ ततःसत्यगणेशप्रीत्यर्थंकथाश्रवणंकरिष्ये ॥ त
दनंतरंव्रतांगगोदानवायनदानतीर्थप्रोक्षणंचकृत्वा जपपूजापारा
यणकर्तॄन्ब्राह्मणान्यथाविभवतोनुगृह्यस्वयंबंधुभिःसहरात्रौजा
गरणंकृत्वा ॥ परेद्युर्नित्यकर्मकृत्वाकलशदानंआचार्यायदत्वायथा
शक्तिब्राह्मणान्भोजयेत् ॥ अशक्तस्तुतद्दिनेवाकुर्यात् ॥ इतिस
त्यगणपतिपूजाविधिः ॥ ६ ॥ ॥ अथसत्यगणप
तिव्रतोपाख्यानं ॥ सूतउवाच॥ सत्यलोकेसमासीनंब्रह्माणंनार
दोब्रवीत् ॥ लोकानांहितमन्विच्छन्प्रणयावनतोभृशं ॥ १ ॥
नारदउवाच ॥ भगवन्सर्वतत्वज्ञपितःकरुणयावद ॥ कःसेव

नीयोमनुजैर्हितार्थंवांछितार्थदः ॥ २ ॥ अल्पायासेनफलदं
समोयुगचतुष्टये ॥ ब्रह्मोवाच ॥ ॐकाररूपीभगवान्योवेदादौ
प्रतिष्ठितः ॥ ३ ॥ देवःप्रत्यक्षफलदःकलौसिद्धिविनायकः॥अ
त्राप्युदाहरंतीममितिहासंपुरातनं ॥ ४॥ शिवपार्वतिसंवादंकलौ
सद्यः फलप्रदं ॥ एकदासुखमासीनः कैलासेवृषभध्वजः॥५॥ए
वमेवकृतप्रश्नांपार्वतींसउवाचह ॥ शिवउवाच ॥ कदाचित्स्वाश्र
मेसंस्थःसुदामाकिंचनोद्विजः ॥६॥ स्वाचारःपरमोदारःस्त्रियासं
बोधितोययौ॥पटच्चरेसमाबध्यचिपिटान्क्लेशसंचितान् ॥ ७ ॥
द्वारकायांवासुदेवंद्रष्टुंमित्रंपुराभवं ॥ तेनसंमानितोत्यंतंसेवया

॥१०॥

भोजनादिना ॥ ८ ॥ तंभुक्तवंतमेकांतेज्ञात्वाकृत्यंतदंगितं ॥
भुक्त्वातानूपृथकानूजीर्णान्मनसापरितृप्यत ॥ ९ ॥ ममामि
किंचनत्वंराज्ञिमित्रेकियानिति ॥ अलक्ष्मींनाशयाम्यस्यश्रीवि
नायकतोषतः॥१०॥ इतिसंचिंत्यपप्रच्छकुशलंतेकुटुंबके॥कयावृ
त्याकरोषित्वंस्वपोष्यपरिपालनं ॥ ११ ॥ निशम्यमाधवींवाणीं
न्हीणः पुनरुवाचतं ॥ सुदामोवाच ॥ त्वयिनाथेजगत्क्षेमकिमु
मित्रकुलेतव ॥ १२ ॥ बिभर्मिभृतकृत्येनपोष्यवर्गंयदूद्वह ॥
श्रीकृष्णउवाच ॥ अयाचितमिदंवृत्तंसोढुं कठिणमच्युत॥ १३ ॥
ईश्वरार्पणबुध्यैवनित्यकर्महृतंयतः॥ भुक्तिमुक्तिप्रदंदेवंभजसत्य

विनायकं ॥ १४ ॥ इतिसंबोधितोविप्रःसुदामाकरुणात्मना ॥
हरिणातंप्रत्युवाचकोसौसत्यविनायकः ॥१५ ॥ श्रीकृष्णउवाच
 ॥ यःसर्वाद्यःसर्वपूज्योब्रह्मणांब्रह्मणस्पतिः ॥ वयंयस्यगणाःस
र्वेदेवाविधिहारादयः ॥ १६ ॥ यजंतेविमलात्मानोनान्येहठपरा
यणाः ॥ तस्यव्रतंकुरुसखेसद्यःफलमवाप्स्यसि ॥ १७ ॥ लो
कानामुपकारायस्यात्वयाचरितव्रतं ॥ कलौसिद्धिविहीनानां
स्वल्पायासेनकामदं ॥ १८ ॥ सुदामोवाच ॥ कस्मिन्मासिदि
नेवापिकार्यंकोवाविधिस्मृतः ॥ किंफलंयस्यकस्याभूदेतन्मेसक
लंवद ॥ १९ ॥ सर्वलोकोपकारार्थंव्रतस्यास्यप्रसिद्धये ॥ कृष्णउ ॥११॥

वाच ॥ अहंवदामितेप्रीत्याविधानंव्रतसंभवं ॥ २० ॥ यतःपुष्टि
पतेर्जन्मवैशाखेपूर्णिमादिने ॥ तस्यांवरचतुर्थ्यांवाभौमेवाभृगुवा
सरे ॥ २१ ॥ यस्मिन्कास्मिन्दिनेवापिप्रातः संकल्पयेद्व्रतं ॥
तिलामलककल्केनस्नायान्नित्यविधिंचरेत् ॥ २२ ॥ पुनः प्रदो
षसमयेव्रतीस्नानंचरेत्प्रिये ॥ स्वस्तिवाचनकंकृत्वाखेटान्गोम
यशोधिते ॥२३॥ रंगवल्लीयुतेदेशेकदलीस्तंभमंडिते ॥ सुगंधि
नानापुष्पाढ्यामादर्शावलिराजितां ॥ २४ ॥ कुर्यान्मंडपिकांचा
रुतन्मध्येकलशंन्यसेत् ॥तत्रवैनायकंयंत्रंचतुर्द्वारविराजितं॥२५॥
लक्ष्मीनारायणंचैवपार्वतीपरमेश्वरौ ॥ महीवराहकौशक्तिमदनौ

स० ग० कोणादिक्रमात् ॥२६॥ लिखेदष्टदलंचापिदेशिकाज्ञामवाप्यच॥ क०
अष्टगंधेनविलिखेद्रक्तचंदनतोपिवा ॥ २७ ॥ पूजाद्रव्याणिसं
॥१२॥ प्रोक्ष्यमध्येसत्यविनायकं ॥ अधिकारानुसारेणवित्तशाठ्यविव
र्जितः ॥ २८ ॥ गोरजच्छुरिताकाशेपूजयेद्वैदिकादिभिः ॥ मंत्रैः
षोडशकैश्चैवोपचारैस्तत्रकल्पयेत् ॥ २९ ॥ गोधूमचूर्णसंयुक्ता
न्शर्करापरिमिश्रितान् ॥ सपादसर्पिःक्षीरोत्थपाकसंभवमोद
कान् ॥ ३० ॥ यथाविभवतोनानापक्वान्नानिनिवेदयेत् ॥नैवेद्या
र्थंततोबीजपूरंमुखविशुद्धये ॥३१॥शमीमंदारदूर्वाभिर्मंत्रपुष्पांज ॥१२॥
लिन्यसेत् ॥ ३२॥ श्रुत्वाकथांसमभ्यर्च्यगंधमाल्यादिभिर्द्विजान्

॥ पतिवत्न्यस्त्रियोप्येवंहरिद्राकुंकुमादिभिः॥यथाशक्त्याद्विजाभो
ज्याःपश्चाद्बंधुजनैःसह॥३३॥स्त्रीभिः प्रसादंसंभुज्यततोजागरणं
चरेत्॥शास्त्रवादैर्नृत्यगीतैरूपकैर्विविधैरपि॥३४॥बालानांदंडली
लाभिः खेलैर्बुद्धिबलादिभिः॥स्वयंसमाहितमनायावत्सूर्योदयोभ
वेत् ॥३५॥ एवंव्रतंप्रकुर्वाणःसद्यःफलमवाप्नुयात् ॥धनंधान्यंपशू
न्दारान्सुतमायुर्निरोगिणं ॥३६॥मानंसुविद्यांलभतेनिष्कामोमो
क्षमाप्नुयात्॥ब्रह्मणाकारिसृष्ट्यर्थंजगत्येकार्णवेपरं ॥३७॥ साक्षा
न्मगलमूर्तिस्तंसामर्थ्यंविविधंददौ ॥ हरिणाकारिविघ्नैतत्स्वाधि
कारार्थसिद्धये॥३८॥मयासंसाधिताशक्तिः पालनेकुर्वताव्रतं ॥स्वे

च्छावतारसामर्थ्यंततःप्राप्तंसखेपरं॥३९॥सदैवाहंकरोम्येतद्व्रतंतु
भृगुवासरे॥श्वोस्तितन्मेकारयितुमाचार्यस्त्वागमिष्यति ॥४०॥ग
र्गस्तुमांप्रतिश्रुत्यप्रसादंप्राप्ययास्यति॥भगवद्भिरमाकर्ण्यस्थितः
परमयामुदा ॥४१॥अपरस्मिन्दिनेगर्गस्समभिसृत्यतद्व्रतं ॥कार
यित्वाव्रतंसम्यक्स्वाश्रमंप्रययौमुदा ॥ ४२ ॥ सायंप्रसादावस
रेह्लादिचिंतितवानसौ॥ मयाभृतेनवृत्तेनयदाकिमपिलभ्यते॥तदैवं
पूजयिष्यामिदेवंसत्यविनायकं ॥४३॥ भुक्त्वाप्रसादंहरिणाकृत्वा
जागरणंसह॥शुद्धचित्तद्विजोभक्त्याभजन्सत्यविनायकं ॥४४॥
गच्छन्मार्गेचित्रमभूत्तच्छृणुध्वंमहर्षयः॥४५॥सूतउवाच ॥ मणि

र्नामावणिकश्चित्कूप्यरत्नादिभिर्वृतः ॥क्रयात्संपादितैः क्लेशात्तश

तमाहिषवाहितैः ॥४६॥गृहंयास्यन्प्रसुष्वापकश्चिद्ग्रामेनिशामुखे

दस्युभिस्तद्धनंरात्रौहृतंसर्वंत्रमंजसा॥४७॥उषःकालेगंतुकामस्त

द्रव्यंनावपश्यत॥धनव्यपायात्संतप्तोविललापातिदारुणं ॥४८॥

यदृच्छयाजगादासौतस्मात्किमपिलभ्यते।दास्येतदर्धंविप्रायपूर्वं

दृग्विषयायमे॥४९॥इतस्ततोविचिन्वन्त्समंजूषांलब्धवानसौ॥स्वर्ण

मुद्रासहस्रंस्यसुदामातावदाययौ॥५०॥तस्मैपंचशतंमुद्रान्दत्तवा

न्सवणिङ्मुदा॥तस्मिन्नेवदिनेतत्रकृतवान्त्समुनिर्व्रतं ॥ ५१॥ सा

यंपूजांविधायासौनिबद्धकरसंपुटः ॥शुद्धांतरात्मासंतस्थावाकांक्ष

न्प्रभुदर्शनं॥८२॥नासाग्रन्यस्तनयनोदृढासनपरिग्रहः॥तावत्प्रक
टतांयातः पुरः सत्यविनायकः॥दशायुधधरःश्रीमान्देवःपंचास्य
वाहनः॥किरीटकुंडलधरःपीनवक्षोबृहद्भुजः॥८४॥नाभिशेषोगज
मुखोवामांगेसिद्धिमंडितः ॥ दृष्ट्वापूर्वंसुदामातंकोटिमन्मथसुंदरं ॥
कोटिचंद्रादित्यकांतिंतत्पादन्यस्तमस्तकः॥नुनावपरयाभक्त्याव
रदंविघ्ननाशनं॥८६॥सुदामोवाच ॥सदासर्वरूपंत्रिसत्यंत्रिभेदैर्वि
हीनंसमंनेतिरूपंपुराणं ॥नुतंयोगिभिर्वेदमुख्यैःशिवाद्यैर्गणानांप
तिंज्येष्ठराजंभजामि॥८७॥इतिस्तुत्वाननर्तासौसरोमांचःसगद्गदः
॥मेनेधन्यंसमात्मानंतपोविद्याकुलंवयः॥८८॥शिवउवाच॥तुष्टोभ

क्त्यापरमयातमाहसविनायकः॥५९॥सत्यविनायकउवाच॥वरय
स्ववरान्विप्रसुदामन्स्वमनोगतान्॥ व्रतेनपरितुष्टोहंभक्त्यास्तो
त्रादददामितान्॥६०॥सुदामोवाच॥नविदुर्यत्स्वरूपंतेब्रह्माहरिहरा
दयः॥कमन्यंहिवरंयाचेकृपयादृक्पथंगतः॥६१॥देहिभक्तिंत्वच्चर
णेदृढामव्यभिचारिणीं॥६२॥श्रीशिवउवाच॥दत्वाभक्तिंदृढांतस्मै
संपदंधनदाधिकां॥ययौस्वानंदभवनंदेवः सत्यविनायकः॥६२॥
इतिश्रीब्रह्मांडपुराणेशिवपार्वतिसंवादेसत्यविनायकव्रतोपाख्या
नेप्रथमोध्यायः॥ पार्वत्युवाच ॥ अंतर्हितेभगवतिदेवेसत्यविना
यके॥सकथंसंपदंलेभेपरांप्राणेशतद्वद ॥१॥ कुर्वन्भृतकवृत्तेनउं

स०गा० च्छवृत्तिपरायणः ॥ शिवउवाच ॥ प्रसादार्थंजागरायसमाहूताः ७०
समागताः ॥ २ ॥ ग्रामिणाःपुरुषानानास्तेषुवैश्यः सच्चायघौ ॥
॥ १९॥ दृष्टुंतच्चित्रमखिलंविनयात्पृष्टवानसौ ॥ ३ ॥ मणिरुवाच ॥ भ
वानकिंचनोतीवलब्ध्वापिविपुलंधनं ॥ अस्मिन्व्ययीकरोत्सर्वं
किमेतत्कृपयावद ॥४॥ अहंतदाचरिष्यामिव्रतंशोकसमाकुलः ॥
श्रुत्वासविनयांवाणींततोसौसदयोद्विजः ॥ उक्त्वासर्वंसवृत्तांतंत्र
तंतस्माउपादिशत् ॥ विलोक्यचित्रंतत्सर्वंजनाःसद्भावभाविताः
॥६॥ ददुर्नानाभूषणानिवसनानिधनानिच ॥पुनर्द्विगुणद्रव्येणसु
दामास्वगृहंययौ॥७॥नापश्यत्तांपर्णकुटींचिंतांपरामिकागमात् ॥ ॥१९॥

तावत्तुसेवकास्तस्यकांतयापरिनोदिताः ॥८॥अभिगम्यार्चयामा
सुस्तैलाभ्यंजनपूर्वकं॥स्नापयित्वाह्यलंचक्रुरंशुकैर्भूषणैश्शुभैः॥९॥
अत्याश्चर्ययुतौचोभौपश्यतःसर्वसंपदः॥रत्नकांचनभित्तिश्चपर्यंक
न्यस्तसंचयान् ॥ १० ॥ मुक्तामणिगणैश्चित्राण्यनेकानिस्थले
स्थले॥ हैमानिसर्वपात्राणिभक्ष्याणिविविधानिच॥११॥दृष्ट्वैवसर्व
मखिलंभर्तारंसाजगादह ॥ किमिदंभवनंक्षुद्रंजातमिंद्रगृहोपमं॥
॥ १२॥ ततोब्रवीत्सुदामातंवृत्तांतमखिलंनिजं ॥१३॥ सुदामोवा
च॥दृष्ट्वामद्द्विपदंकांतेसखामेयदुनायकः॥ मह्यंसंबोधयामाससत्ये
शपरवानसौ ॥ १४ ॥ विधियुक्तंगुरुमुखात्सद्यःप्रत्ययकारकं ॥

अत्यल्पायाससंसाध्यंभुक्तिमुक्तिफलप्रदं ॥ १५ ॥ व्रतंवैनायकं
यस्यप्रभावोयंविराजते॥अकल्पिताःसंपदोत्रदृश्यंतेस्वर्गदुर्लभाः
॥१६ ॥भुंक्ष्वनिर्विण्णमनसाभजंतीविघ्ननाशनं ॥ यमामनंतिवे
दांताब्रह्मणांब्रह्मणस्पतिं ॥ १७॥ सर्वादिपूज्यंज्येष्ठानांज्येष्ठंगण
गणेश्वरं ॥ बुद्धेःपरतरंतस्याश्चालकंप्रणवात्मकं ॥ १८ ॥ स्वा
नंदनिलयंभक्तप्रियोसौविघ्ननाशनः॥ सारंविद्धिविशालाक्षितुष्टः
सत्यविनायकः॥१९॥स्वयंदत्तंबहुतरंअल्पमेवाहिमन्यते ॥भक्त्या
समर्पितंस्वल्पंसदेवोबहुमन्यते॥ २० ॥ततस्तौपूर्णिमायांतंप्रति
मासंव्रतंशुभं ॥ चक्रातेमोदभरितौसकुटुंबैस्ततोद्विजाः ॥ २१ ॥

भुक्त्वैवविविधान्भोगान्स्वानंदंप्रतिजग्मिवान् ॥ २२ ॥ इति
श्रीब्रह्मांडपुराणेशिवपार्वतिसंवादेविनायकव्रतोपाख्यानेद्वितीयो
ध्याय: ॥ २ ॥ ऋषयऊचु: ॥ सूतत्वद्वदनांभोजात्कथांचित्रांव्रता
श्रयां ॥ शृण्वंतोनहितृप्यामः सुधायामिवमानवः ॥ १ ॥पुरो
वदमहाभागभोसतांरोमहर्षण ॥ ततः किमकरोद्वैश्यस्सुदाम्न:
प्राप्यतद्व्रतं ॥ २ ॥ सूतउवाच ॥ नह्यपुण्यवतांलोकेमतिःसत्यवि
नायके ॥ भवंतःसाधुचरिताब्राह्मणावेदवादिन: ॥ ३ ॥ तत्किंचि
त्रंभक्तिमंतः सततंब्रह्मणस्पतौ ॥ भवदाज्ञास्फुरद्बुद्धिःकथयेतांय
थाश्रुतां ॥ ४ ॥ शिवउवाच ॥ सोप्याययौस्वनगरंयदाकच्छभु

स०ग० जाभिधं ॥ वृत्तांतंकथयित्वासौस्वजनान्मार्गसंभवं ॥ ५ ॥ परेह रू०
निचकाराशुतावद्भिभवसंयुतः ॥ मणिर्भक्त्यापरमयासत्यवैनाय
॥ १७॥ कंव्रतं ॥ ६ ॥ सायान्हपूजासमयेश्रेणीमुख्यान्सनागरान् ॥ ब्रा
ह्मणान्वेदविदुषोराज्ञोमंत्रिवरंतदा ॥ ७ ॥ चित्रबाहुंनिजंमित्रंप्र
सादायसमाव्हयत्॥मित्राहूतेनहृष्टोसौतूर्णंगत्वासतद्गृहं ॥८॥ प्र
सादमुपगम्याथस्वमित्रंनिजगादह ॥ ९ ॥ चित्रबाहुरुवाच ॥
कुशलंतेप्रवासितंकच्चिदर्थंनिरामयं ॥ इतिमित्रवचः श्रुत्वाकुश
लप्रश्नपूर्वकं ॥१०॥ स्ववृत्तंमार्गसंभूतंद्रव्यापायंव्रतागमं ॥ क
थयामाससमणिर्यावत्तावत्समागताः ॥ ११ ॥ चोरास्तद्द्रव्यमा ॥१७॥

दायकूप्यरत्नादिसंयुतं ॥ पूर्वंत्वपहृताश्चोराःसभ्याइवतदंतिके ॥
॥१२॥ दर्शयामासुरथतेदेवमायाविमोहिताः॥ रत्नानिरत्नखचिता
लंकारान्सचिवायतान् ॥१३॥ क्रय्यार्थंसतुतान्सर्वान्परीक्षार्थंस
मर्पितान्॥मणयेदर्शयामाससपश्यन्निदमब्रवीत् ॥१४॥ चित्रवा
होइमेचोरामदीयधनहारिणः ॥ त्वयामुक्तावलीयवैपूर्वंवैवाहिको
त्सवे॥१५॥अनर्घ्यमाणिक्यमयींतामेतांस्मरतद्भवान् ॥ तांचस्वी
यांनिश्चिकायरुरोषसचिवस्तदा ॥१६॥ तावत्प्रकृतिनाज्ञातांज्ञा
त्वातेदस्यवःप्रिये ॥ भयंभीताःसंदधिरेहृदयेदृष्टप्रत्यया:॥१७॥स
वंगृहीत्वाप्रकृतिर्यदिमोक्ष्यतिवानवा ॥ तदैनंपूजयिष्यामोदेवंस

स०ग० त्यविनायकं॥१८॥तथासौनिजगादोच्चैस्तच्चेतःकंपयन्निव ॥१९॥ क०
चित्रबाहुरुवाच॥प्रियंकराहेकितवसभ्यकस्मादियंत्वया ॥लब्धा
॥१८॥ सुमुद्रिकासत्यंवदसर्वंसहाम्यहं॥२०॥नोचेद्राज्ञेनिवेद्याशुसर्वान्व
श्चोरसत्तमान् ॥ विनिशिक्षामिदंडेनमहतोपायकारकान्॥२१॥
इतिप्रातिनिधेर्वाचंश्रुत्वासंजातसाध्वसाः ॥ ऊचुस्तेप्रस्खलद्वाचः
कंपमानांगयष्टयः ॥ २२ ॥ सर्वंयथातथावृत्तंनिखिलंचदुर्धनं ॥
गृहीत्वातत्प्रतिनिधिस्तेभ्योदत्वामणिंप्रति ॥ २३ ॥ मुमोचचो
रान्सकलान्सत्यभाषणतोषितः ॥ एवंव्रतप्रभावेणसमगिर्लब्ध
वान्धनं ॥ २४ ॥ ततोतिहृष्टमनसाप्रतिमासंपुपूजह ॥ भुक्त्वा ॥१८॥

सविविधान्भोगान्क्रमात्स्वानंदमेयिवान् ॥२५॥ ब्रह्मोवाच ॥ त
तोदृष्टप्रत्ययोसौप्रधानोह्लदिनारद ॥ व्रतंसम्मानयामाससुपुत्रा
वाप्तयेपरं ॥ २६ ॥ लब्ध्वासुपुत्रंमुदितोविसस्मारव्रतंशुभं ॥ ततो
विघ्नाभिभूतःसराज्ञास्वल्पापराधतः ॥२७॥ पुरात्सर्वस्वमादाय
ययौनिष्कासितोबहिः ॥ रेवातीरेचरन्भिक्षांगिरिपुत्रीशुभाश्रमे॥
॥२८॥नतोमुनिवरंदुःखाच्चित्रबाहुरुरोदह ॥ ध्यानेनालोक्यत
स्यागःसमुनिस्तंजगादवै॥२९॥श्रीशुकोवाच ॥ मारोदीश्चित्रबा
होत्वंस्मरसत्याविनायकं ॥ सर्वादिपूज्यंसर्वैश्चपुत्रार्थेमानितंपुरा
॥३०॥ शिवउवाच ॥ इतिसंस्मारितस्तेननव्रतंसस्मारविस्मृतं ॥ त

Scanned with OKEN Scanner

तोदारापुत्रयुतश्चक्रेतत्रैवतत्पुनः॥३१॥ ततोव्रतप्रभावेणतद्राज्ञा
धर्मकीर्तिना ॥ विचार्यबहुमानेनसमाहूतःसमाययौ॥३२॥राज्ञः
प्रीतिंपरांप्राप्यसंस्थानंसमुपागमत् ॥ तेपिचोराःसमायाताःस्व
देशंमगधाभिधं॥३३ ॥ त्यक्तचौर्याः सदाचारास्तत्प्रसादात्सुबुद्ध
यः ॥ तदासंभृतसंभारःफल्गोस्तीरेसुशोभने ॥३४॥ कृत्वामंडपि
कांचार्वींकदलीस्तंभमंडितां ॥ पुपूजुःपरयाभक्त्यादेवंसत्यविना
यकं॥३५॥तेपिचोराव्रतवशात्भुक्त्वाभोगान्मनोगतान् ॥ शुद्धा
त्मानः क्रमात्सर्वेब्राह्मणाअन्यजन्मनि ॥३६॥ यइदंपरमंगुह्यंपठे
द्यःसुसमाहितः ॥ ज्ञानंलब्ध्वापरांशांतिंलभतेनात्रसंशयः॥३७॥

॥११॥

इतिश्रीब्रह्मांडपुराणेशिवपार्वतिसंवादेसत्यविनायकोपाख्यानेतृ
तीयोध्यायः॥३॥सूतउवाच॥तत्राकस्माद्ययौकाचिल्ललनारुदतीभृ
शं ॥ दुःखार्ताम्लानवदनात्यजतीजीवितंस्वकं ॥१॥ तथाभूतांतां
निरीक्ष्यभार्गवोवेदविद्द्विजः॥ परदुःखसहिष्णुस्तद्धूताचार्योजगा
दह॥२॥भार्गवउवाच॥कासिकस्यासितन्वंगिकुतोत्रागमनंतव ॥
किंदुःखंवदकल्याणिहरेत्सत्यविनायकः ॥ ३ ॥ इतितद्वाक्यमाक
र्ण्यकिंचिद्धर्षवतीसती ॥ द्विजवाग्जातविश्वासास्ववृत्तांतंजगाद
ह ॥४॥ सुनीथोवाच ॥ चंद्रसेनइतिख्यातोराजामालवदेशपः ॥
वदान्योरूपसंपन्नस्तेजस्वीशंसितव्रतः ॥ ६ ॥ धर्मात्मासत्यवच

सं०ग० नोवेदशास्त्रार्थतत्त्ववित् ॥ चतुरंगबलोपेतः सर्वलक्षणलक्षितः ॥ क०
॥६॥ रक्षितावसुधांसर्वांप्रजाः पुत्रानिवौरसान् ॥ तस्याहंमहिषी
॥२०॥ नाम्नासुनीथापुत्रवर्जिता॥७॥परिणीतापराजायानाम्नासामदन
वती ॥ गुणमान्नातिमांश्चोभौप्रधानौसर्ववित्तमौ ॥८॥ सुनीतिकुश
लौस्यातांकार्तिकेयपराक्रमौ ॥समेभर्तावशंनीतः सपत्न्यासर्वदा
भवत्॥९॥रमतेहर्निशंसोपिनानालंकारभूषणैः ॥ नवियोगंहिस
हतेक्षणमात्रंतयाक्वचित् ॥ १० ॥ मांधिक्करोतिसामुग्धानशृणोति
चमद्वचः ॥ रुष्टामामीक्षतेनित्यंनगृह्णातिमयार्पितं ॥ ११ ॥ त
स्यादास्यंविधायैवस्थितावेश्मनिदुःखिता ॥ अपरस्यामभूत्सूनुः ॥२०॥

सपत्न्यांचारुलोचनः॥१२॥चकारजातकर्मास्यविधिनानामचाक
रोत् ॥ द्विजेरितःपद्मसेनइत्थंसववृधेततः ॥१३॥ शुक्लेचंद्रइवश्री
मानष्टमेव्रतबंधनं ॥ समाप्तविद्यायततोमद्रनाथःसुतांददौ॥१४॥
राजाकतिपयाहस्सुगतेषुप्राणवल्लभः ॥गयायात्रार्थमायातः परि
वारयुतोद्विज ॥१५॥तत्रयात्रांसमाप्यासौश्रांतः सुष्वापमंचके ॥
सपत्नीतंसेवयितुंगतातच्चरणांतिकं ॥१६॥ मांवीक्ष्यसाकलुषिता
प्रपदेनहनद्रुषा॥ततोतिदुःखिताह्रीणाप्राणत्यागायसंगता॥१७
भर्तानमनुतेयातांनसापिमनुतेकदा ॥ अतःकिंजीवितेनात्रशोष
यामिकलेवरं ॥१८॥पिबेविषंमुनिवरनमनोयातिनिश्चयं ॥ एत

 स्मिन्नंतरेदृष्टंभवत्पादांबुजंशुभं ॥१९॥किमिदंक्रियतेसर्वैःकोवाद
वः प्रपूज्यते ॥ किंफलंलभतेयस्माद्वदविप्रदयानिधे॥२०॥अहम
 प्याचरिष्यामियदिपूर्णमनोरथा ॥निशम्यतस्यास्तांवाणींसदयः
पारवेदिनीं॥२१॥व्रतंतदखिलंतस्यैबभाषेभार्गवाग्रणीः॥२२॥भा
र्गवउवाच॥ संन्यस्तचौर्याचरणैर्भक्तिमद्भिस्तुबुद्धिभिः॥स्ववृत्तोपा
त्तसधनैरुपास्यद्भिर्यथातथं ॥ २३ ॥ व्रतस्थैः पूज्यते भक्त्यादे
वःसत्यविनायकः ॥ इतितद्वचनंश्रुत्वाकरिष्येव्रतमुत्तमं॥२४॥तत
स्त्त्वदन्यशरणामादिदेशव्रतंशुभं ॥ ददौप्रसादंतांसर्वंक्षीरपाक
विनिर्मितं॥२५॥ भुक्त्वाप्रसादंसातत्रयातास्वस्थानिजंस्थलं ॥

Scanned with OKEN Scanner

ध्यायंतीसर्वदाचित्तेप्रभुंसत्याविनायकं॥२६॥ इतिश्रीब्रह्मांडपुरा
णेशिवपार्वतिसंवादेसत्यविनायकोपाख्यानेचतुर्थोध्यायः॥४॥पा
र्वत्युवाच ॥ देवदेवजगन्नाथमहेशकरुणाकर ॥ पातिव्रत्यतयाब्रू
हिकथमाचरितंव्रतं॥१॥ प्रियाप्रश्नंसमाकर्ण्यजगादभगवान्हरः
॥२॥ शिवउवाच॥समाप्ययात्रांसययौनृपःकर्णावतंपुरं॥स्वंराज्यं
पालयामासधर्मेणयशआर्जयन् ॥२॥ नित्यंविनायकध्यानात्तत्प्र
सादस्यभक्षणात्॥बुद्धिभेदोबभूवास्याप्रियांमेनेसतीमुखीं॥३॥ त
तोदृष्टप्रत्ययासाभरद्वाजंमुनिंगुरुं ॥ समाहूयजगादाथव्रतावाप्तिं
कथांनिजां॥४॥सोप्याहतांमयाप्येतन्मंगळायोपदेशितं॥व्रतंकुरु

स०ग० ष्वसुभगेमानुष्येप्यमृतायनं ॥५॥ एवंव्रतप्रभावात्सासद्यस्तद्व्रत क०
माचरत्॥सायंपूजाविधानायगुरुणापतिमाव्हयत् ॥६॥प्रेक्ष्यव्रतं
॥२२॥ नृपोयास्यन्प्राहासौमदनावतीं ॥७॥एहिप्रियेमयादृष्टोविनायक
व्रतोत्सवः ॥ साहनोयाम्यहंतत्रभृशंशूलवतीप्रभो ॥ मयात्वद्रष्टु
कुतुकोतथापित्वरितंययौ ॥ ८ ॥गुर्वाज्ञयाशापभीताततःपतिपुरः
सरा ॥ विधायपूजांश्रुत्वैतत्कथांतौद्विजदंपती ॥९ ॥ संभोज्यमान
यामासदक्षिणाभूषणांशुकैः ॥ सुवासिनीःसमानर्च्यकंचुकीकुंकु
मादिभिः ॥ १० ॥ सुगंधचूर्णतैलाद्यैस्तेनपत्यासुहृज्जनैः॥ ततः
सादंसासर्वंक्षीरपाकविनिर्मितं ॥ ११ ॥ नानाभोज्यसमायुक्तं ॥२२॥

बुभुजेतंवराननेे ॥ ततश्चक्रेजागरणंजंपतीविभुनामसा ॥ १२ ॥
वरांगनानृत्यगीतैरूपकैर्विविधैः शुभैः॥ पुराणचर्चयानानाभगव
द्गुणकीर्तनैः ॥ १३ ॥ तद्व्रतस्यप्रभावेणरेमेतत्रैवभूपतिः ॥ दिना
निकतिचित्तस्याविनयेनवशीकृतः॥ १४॥ लेभेगर्भंततोराज्ञीश्री
विनायकतोषतः ॥ ततःशिष्टंप्रसादंतंसमादायसमाययौ ॥१५ ॥
सपत्न्यामंदिरंसाध्वीतांददौप्रेमसंयुता ॥ सादुष्टभावातांवीक्ष्यरु
रोषसुभृशंहृदि ॥ १६ ॥ तस्याःप्रसादमादायमंदिरान्निरवासय
त् ॥ प्रसादमपितंरोषाद्दुरंत्यक्तवतीखला ॥ १७ ॥ रुष्टासुष्वा
पसामंचकोणेस्वांचैलासंयुता ॥ नममर्षसमायातांपतिप्रणयसंयु

तां ॥१८॥ प्रसादस्यापमानेनतद्भक्तायाश्छलेनच॥ जाताकुष्ठयु
तादुष्टाप्रातस्त्वांवीक्ष्यभूपतिः॥१९॥जहौनिर्भर्त्स्यकुटिलांसुनीथा
निरतोभवत् ॥ सुषुवेसासुतंसुभ्रुःपंचोच्चग्रहमंडिते॥२० ॥शुभेमुहू
र्तेराजापिददौदानानिभूरिशः ॥ ब्राह्मणेभ्यः पुत्रजन्महृष्टचित्तोय
थार्हतः ॥ २१ ॥ कृत्वातज्जातकर्मादिज्योतिर्विदनुमोदितः ॥ च
क्रेलक्षप्रदंनाम्नाभूषयामासभूषणैः॥ २२ ॥ अतिप्रीतिमतीसाध्वी
सुनीथात्वभवत्तदा॥सिषेवेहर्निशंभक्त्याप्रभुंसत्यविनायकं॥२३॥
बभूवातितरारुग्णाखिन्नासामदनावती ॥पश्चात्तापवतीपश्चात्सप
त्नींशरणंययौ ॥ २४ ॥ तामाहसाधुशीलातंभजसत्यविनायकं ॥

प्रसादस्यापमानेनदुःखंभुक्तंवरानने ॥ २५ ॥ ततोगुरुंसमाहूयन
तास्वपतिनासह॥सपत्नींचैसोप्याहसद्यस्तेह्यशुभंहरेत् ॥२६॥ उ
पायंसततस्तस्याःसौहार्दपरितोषितः ॥ कथयामासचंद्रेणसापरा
धेनसाधितं॥२७॥नामानिसुमुखाद्यानिजयपूर्वाणिसुंदरि॥नित्यंवि
नायकांतानिप्रतिमासंपृथक्पृथक् ॥२८॥ यावत्कार्यंभक्षणाद्यंपूर्वं
मुक्त्वाकुरुष्वेति॥व्रतंचकारयामासपुनःपत्यातदर्थतः ॥२९॥तद्व्र
तस्यप्रभावेणसापिरोगोज्झिताभवत् ॥ ततोदृष्टप्रभावोसौचंद्रसे
नोनृपोत्तमः ॥३०॥ प्रतिमासंपुपूजैनंदेवंसत्यविनायकं ॥ नित्यं
नियमसंयुक्तोताभ्यांस्त्रीभ्यांबभूवह ॥३१॥ कृत्वादेवालयंचारुसौ

स०ग० वर्णैरत्नभूषितं ॥ तन्मध्येस्थापयामासदेवंसत्यविनायकं ॥३२॥ क०
तत्पुरस्तीर्थममलंगुरोरुल्लंघनक्षमं ॥ चक्रेततःपत्रथैतद्वुविकर्णा
॥२४॥ वतंपुरं॥३३॥भुक्त्वासविविधान्भोगानीप्सितान्देवदुर्लभान्॥
॥ पुत्रेराज्यधुरंन्यस्यस्त्रीभ्यांकांतारमाविशत् ॥३४॥ व्रतप्रभावा
च्छुद्धात्मायोगसाधनतत्परः ॥ स्वानंदमायूषेंतेसययौसत्यविना
यकं ॥३५॥ इदंव्रतंयःकुरुतेनरःपरमदुर्लभं ॥ शृणुयाच्चकथांपु
ण्यांभुक्तिमुक्तिप्रदायिनीं॥३६॥ सर्वान्कामानवाप्नोतिसद्यःसत्य
विनायकात् ॥ पुत्रार्थीलभतेपुत्रान्धनकामोलभेद्धनं ॥३७॥भा
र्यार्थीलभतेभार्यांव्रतीसद्योनगात्मजे॥अंतेस्वानंदमाप्नोतिभुक्त्वा ॥२४॥

भोगान्यथेप्सितान् ॥ ३८ ॥ पार्वत्युवाच ॥ कथायांसकथंसेव्यो
प्रसादोव्रतिनाशिव ॥३९॥ शिवउवाच ॥ तिष्ठेत्स्वीकृततीर्थोसौ
तद्दिनेनियतोव्रती ॥ पंचम्यांसमयेपश्चात्पारणावसरेप्रिये॥४०॥
॥ सूतउवाच इतिवःकथितंनानाकथांतरसमन्वितं ॥व्रतंवैनायक
स्येदंशौनकाद्यामहर्षयः ॥४१॥ यथाशिवेनकथितंगिरिजायैशुभा
वहं ॥ ब्रह्मणानारदायोक्तमादरात्परिपृच्छते ॥ ४२ ॥ कलेर्मल
हरंनृणांसद्यःप्रत्ययकारकं ॥४३॥ इतिश्रीब्रह्मांडपुराणेशिवपार्व
तिसंवादेसत्यविनायकोपाख्यानेपंचमोध्यायः ॥५॥ ॥ छ ॥

हें पुस्तक म० रा० वे० हुळगोळ नागप्प जोशी
नरसिंह जोशी यांच्या अनुज्ञे प्रमाणे वे० कर्कीं
व्यंकटरमणशास्त्री सूरी यांणीं शोधून वे० रा०
बूदी महाबळेश्वरभट्ट यांच्याकरितां मुंबई
येथें कर्नाटक छापखान्यांत छापविलें॥

ता०२०दिजंबर१८८५

किंमत ४ आणे व ट०ह०१आणा.

॥इतिसत्यगणपतीव्रतकथासमाप्त॥

Scanned with OKEN Scanner